# केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन स्थापितः)

## जयपुरपरिसरः, त्रिवेणीनगरम्, जयपुरम्

## प्राध्यापकविकासकेन्द्रम् (FDC)

# पाठयोजनाधृतः शास्त्रकक्षाध्यापनाल्पावधिकार्यक्रमः

(दिनाङ्कः – 23.03.2026 तः 28.03.2026 यावत्)



कुलपतिः
**प्रो. श्रीनिवासवरखेडी**
के.सं.वि.वि., नवदेहली



निदेशकः
**प्रो. लोकमान्यमिश्रः**
के.सं.वि.वि., जयपुरपरिसरः



मार्गदर्शकः
**प्रो. वाई.एस्.रमेशः**
प्रा.वि.के., जयपुरपरिसरः

केन्द्रसमन्वयिका
**प्रो. रेखाकुमारी**
प्रा.वि.के. (FDC)
के.सं.वि.वि., जयपुरपरिसरः

संयोजिका
**डॉ. किरणखींची**
सहायकाचार्या, व्याकरणविद्याशाखा
के.सं.वि.वि., जयपुरपरिसरः

सह-संयोजिका
**डॉ. विपाशाजैनः**
सहायकाचार्या, साहित्यविद्याशाखा,
के.सं.वि.वि., जयपुरपरिसरः

**स्थानम्**

केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः
प्रा.वि.के. (FDC) कक्षः, बहूद्देशीयभवनम्

# पाठयोजनाधृतः शास्त्रकक्षाध्यापनाल्पावधिकार्यक्रमः

"शिक्षणं नाम कला विज्ञानञ्च।" शिक्षणं हि सर्जनात्मिका वैज्ञानिकी सुव्यवस्थिता च प्रक्रिया, यया शिक्षकः विद्यार्थिनां ज्ञानस्य कौशलस्य व्यक्तित्वस्य च समन्वितं समुचितञ्च विकासं साधयति। शिक्षणस्य कलात्मकः पक्षः शिक्षकस्य अभिव्यक्तौ शैल्यां प्रस्तुतीकरणादिषु व्यक्तीभवति, विज्ञानात्मकपक्षस्तु योजनाबद्धतायां सिद्धान्तनिष्ठतायां क्रमबद्धतादिषु नितरां निहितः दृश्यते। "शिक्षणस्य परमं लक्ष्यम् अधिगमः।" अधिगमो नाम सततं प्रवहन्ती प्रक्रिया, यया विद्यार्थी न केवलं ज्ञानं प्राप्नोति, अपि तु तदात्मसात् कृत्वा स्वव्यवहारे, चिन्तने, आचरणे च परिणमयति। अत एव प्रभावयुक्तं शिक्षणं तदेव यत् विद्यार्थिषु स्थायिनं सार्थकं जीवनोपयोगिनञ्च अधिगमं सृजति। एतत् लक्ष्यं साधयितुं शिक्षणं योजनाबद्धम् उद्देश्यमूलञ्च भवेत्। अतः पाठयोजनया शिक्षणं सुव्यवस्थितं क्रमबद्धं परिणामाभिमुखञ्च विधीयते, येन शिक्षकः सुस्पष्टतया निर्धारयितुं शक्नोति यत् किं पाठयेत्? कथं पाठयेत्? कथं च अधिगमस्य मूल्याङ्कनं कुर्यात्? इति। एतत् मनसि निधाय केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरीयप्राध्यापकविकासकेन्द्रेण 19.01.2026 तः 29.01.2026 पर्यन्तं "शास्त्रशिक्षणादर्शपाठयोजनाल्पावधिकार्यक्रमः" समायोजितः। अमुष्मिन् कार्यक्रमे आभारतं नैके विद्वांसः युवानश्च प्रतिभागिनः समागत्य पाठयोजनाः अलिखन्। एतेन अल्पावधिकार्यक्रमेण अधिगमस्य ज्ञानात्मक-बोधात्मकायामौ सार्थकौ अभूताम्। अधिगमस्य प्रयोगात्मकायामस्य सार्थकतायै केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरीयप्राध्यापकविकासकेन्द्रेण 23.03.2026 तः 28.03.2026 पर्यन्तं "पाठयोजनाधृतः शास्त्रकक्षाध्यापनाल्पावधिकार्यक्रमः" समायोज्यते।

अस्मिन् अल्पावधिकार्यक्रमे पूर्वनिर्मितानां पाठयोजनानाम् अनुप्रयोगात्मकं शिक्षणं वास्तविककक्षासु विधास्यते, येन प्रतिभागिनः अर्जितं सैद्धान्तिकं ज्ञानं व्यवहारिकरूपेण परिणमयितुं समर्थाः भविष्यन्ति। शिक्षकविद्यार्थिनोर्मध्ये सततं संवादः, प्रश्नोत्तरप्रवाहः, विचारविनिमयः, समूहचर्चा, छात्रसहभागितायुक्ताः क्रियाकलापाः प्रमुखतया प्रवर्तन्ते। अत्र विद्यार्थिनां सक्रियसहभागिता

केन्द्रीयतत्त्वरूपेण प्रतिष्ठाप्यते, येन ते केवलं श्रोतारो न भवन्ति किन्तु शिक्षणप्रक्रियायां भागग्रहिणो भवन्ति।

विशेषतः शास्त्रकक्ष्याध्यापने अन्तःक्रियायाः महत्त्वं विद्यते, यतः शास्त्राणि केवलं सैद्धान्तिकानि पाठ्यवस्तूनि न, अपि तु जीवनदर्शनस्य गूढार्थप्रतिपादकानि सन्ति। अतः यदा विद्यार्थिनः शास्त्रीयसिद्धान्तान् स्वानुभवैः सह संयोजयन्ति तदा तेषाम् अधिगमः स्थायी सार्थकश्च भवति।

अनेन अल्पावधिकार्यक्रमेण शास्त्राध्यापकानां यूनां पाठयोजनायाः प्रभावीक्रियान्वयनम्, कक्षाप्रबन्धनकौशलम्, प्रस्तुतीकरणनैपुण्यम्, अन्तःक्रियात्मकशिक्षणविधीनां प्रयोगः इत्यादीनां शिक्षणकौशलानां समुचितः परिष्कारः भविष्यति। युवशास्त्राध्यापकाः न केवलं सैद्धान्तिकं ज्ञानं समवाप्स्यन्ति, अपि तु तस्य व्यवहारिकप्रयोगे दक्षतामपि अधिगमिष्यन्ति। अयं कार्यक्रमः शास्त्रशिक्षणम् अन्तःक्रियात्मकं, सहभागितायुक्तं, अनुप्रयोगाधारितञ्च अधिगमं प्रति सुदृढतया प्रवर्तयन् शास्त्राध्यापकानाम् अध्येतृणाञ्च मिथः अन्तःक्रियायुक्तं शिक्षणकौशलं विकासयितुं मार्गं प्रशस्तीकरोति।

**मुख्यबिन्दवः–**

- ❖ पाठयोजनाधृतं शिक्षणम्
- ❖ छात्राणां सक्रियसहभागिता
- ❖ अन्तःक्रियायुक्तं कक्ष्याध्यापनम्
- ❖ अनुप्रयोगात्मकं शिक्षणम्
- ❖ अध्यापकाध्येतृणां संवादसम्पोषणम्
- ❖ प्रश्नोत्तरं, चर्चा, विचारविनिमयश्च
- ❖ मूल्याङ्कनं प्रतिपुष्टिव्यवस्था च
- ❖ सहभागितायुक्तस्य अधिगमस्य संवर्धनम्

ईदृशस्य अन्तःक्रियान्वितं शास्त्रकक्षाशिक्षणाख्यस्य अल्पावधिकार्यक्रमस्य ध्वन्यङ्कनं भविष्यति, येन भाविछात्राः अध्यापकाश्च एतेन नूतनेन उपक्रमेण लाभान्विताः भविष्यन्ति।

# संसाधकाः



**प्रो. श्रीकृष्णशर्मा**
सङ्कायाध्यक्षचरः, संस्कृतविभागः
जयनारायणव्यासविश्वविद्यालयः, जोधपुरम्



**प्रो. रामकुमारशर्मा**
प्रतिष्ठिताचार्यः, समन्वयकचरः साहित्यविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः



**प्रो. सरोजकौशलः**
विभागाध्यक्षचरः, संस्कृतविभागः
जयनारायणव्यासविश्वविद्यालयः,जोधपुरम्



**प्रो. श्यामदेवमिश्रः**
आचार्यः, ज्योतिषशास्त्रविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः



**प्रो. शिवानी वि.**
सङ्कायाध्यक्षः, व्याकरणम्
कर्णाटकसंस्कृतविश्वविद्यालयः, बेङ्गळूरु

# संसाधकाः



**डॉ. प्रमोदकुमारशर्मा**

सहाचार्यः, संस्कृतविभागः

जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली



**डॉ. नन्दीघोषमहापात्रः**

भारतीयपाश्चात्यविद्याशाखा

केन्द्रीयसंस्कृतविश्वविद्यालयः, श्री सदाशिवपरिसरः



**डॉ. राकेशकुमारजैनः**

सहायकाचार्यः, साहित्यविभागः,

केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः



**डॉ. मधुसूदनमिश्रः**

सहायकाचार्यः, ज्योतिषविभागः,

संपूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

## सर्वेषां हार्दं स्वागतम्